International Journal of Sanskrit Research 2019; 5(4): 65-66

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(4): 65-66
© 2019 IJSR
www.anantaajournal.com
Received: 06-05-2019
Accepted: 08-06-2019

मीनाक्षी व्यास
शोधच्छात्रा, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, भारत

# 'बाणभट्टविरचिता कादम्बरी' - व्यवहारशिक्षाया ग्रन्थ

## मीनाक्षी व्यास

### प्रस्तावना

महाकविबाणभट्टविरचिता कादम्बरी संस्कृतवाङ्मये वस्तुतः एकाऽनुपमाकृतिरस्ति, यस्यां भारतीयतयाऽनुप्राणितं मानवीयं जीवनदर्शनं व्यवहारशिक्षाया माध्यमेनोपस्थापितम्। महाकविरत्र भारतीयस्वर्णयुगस्य संस्कृतेश्चित्रणं एतादृशीं पृष्ठभूमिं निर्माति, यस्यां भारतीयादर्शाणां भव्यराजप्रासादं स्थापयितुकामो बाणभट्टः स्वलेखनीं अग्रेसरीकरोति। अत्र आभिजात्यवर्गीयं नि नवर्गीयं आरण्यकवर्गीयञ्च यदपि जनजीवनं प्रस्तुतं तत्र तस्य युगस्य शिक्षासन्दर्भाणां सुरुचिरा प्रस्तुतिरभवत्।

राज्ञश्चिन्तने चाण्डालकन्याऽपि असाधारणी कृतिरस्ति ईश्वरस्य। या शैक्षिकवाङ्मयस्य विहङ्गमस्वरूपेण स यक्तया अभिन्ना वर्तते।[1] शुकं विषयीकृत्य सा यदपि बोधयति तत्सर्वं सुविज्ञ एव जनः वक्तुं निर्देष्टुं च शक्नोति, न त्वशिक्षित आरण्यको जनः।[2] राज्ञो मंत्री शुकनासोऽपि राजकुमारं चन्द्रापीडं यदुपदिशति तद् न केवलं राजनीतिकदृष्ट्या, न च केवलम् अभिजात्य दृष्ट्या, अपितु जनसामान्यदृष्ट्याऽपि पर्याप्तं महत्वपूर्णमस्ति।[3]

राष्ट्रस्य युवकानां कृते या व्यवहारशिक्षा तदीयवचनेषु समुपस्थापिता सा अन्यत्र दुर्लभतरैवास्ति। राजकुमारश्चन्द्रापीडोऽपि गुरुगृहं गत्वा येषां विषयाणां शिक्षां गृह्णाति, ते विषया सर्वेऽपि व्यावहारिका एव वर्तन्ते।[4] व्यावहारिकशिक्षां स यक्तया गृहीत्वैव चन्द्रापीडः स्वजीवनयात्रां प्रारभते। तदीयं विजयाभियानं न केवलं राज्यस्वार्थलिप्सया ग्रस्तमस्ति, अपितु राष्ट्रभावनया ओतप्रोतं, राष्ट्राभिवृद्धये जनसहयोगमासुमेवास्ति।[5]

कादम्बर्यामन्यान्यपि पात्राणि यानि अभिजात्यवर्गीयादर्शान् प्रति निष्ठावन्ति वर्तन्ते, तानि सर्वाणि तस्य युगस्य मानवतापूर्णससुंस्कृतेः स्वरूपं दर्शयन्ति। पात्राणां ये मानसिका भावा अन्तर्निहिताः सन्ति, ये च बहिरभिव्यक्ताः सन्ति ते सर्वे वस्तुतो मानवचरित्रस्य सपक्षतया अभिनन्दनीयाः सन्ति। सुसंस्कारैः संस्कृतया बुद्ध्या सत्प्रेरितानि कादम्बर्या, पात्राणि सांसारिकताया धरातलेऽपि अध्यात्मं प्रतिष्ठापयन्ति।[6] परिणामस्वरूपं लौकिकाचारेषु उदात्ततताया निदर्शनं प्रणयस्य पृष्ठभूमौ दिग्दर्शितं प्रतीयते। तद् दृष्ट्वेदं वक्तुं शक्यते यत् कादम्बरी महाकवेर्बाणभट्टस्य परिपक्वमानसस्यावदानम् अस्ति, यत्र शिक्षाया स्वरूपं गूढतमं विद्यते।

व्यवहारशिक्षाया माध्यमेनैव कादम्बर्यां भारतीययुगचिन्तनस्य गा भीर्यं विद्यते। युगचेतनाया अजस्रं प्रवहमाना धारा सामग्रं भारतीयं वाङ्मयं आत्मनानुप्राणितं कर्त्तुकामा परिलक्ष्यते।[7] लोकव्यवहारस्याधारे यः कथाप्रासादोऽत्र बाणेन उपक्लृप्तः, स वस्तुतः शिक्षितुकामान् चिन्तनपदान्
नितरामाकर्षति मानवान्। रसानुभूतिमुपस्थाप्य बाणभट्टः न केवलं स्वीयं रचनाकौशलं प्रस्तौत्यपितु साहित्याराधनतत्परान् अपि निर्दिशति भाविभारतीयान् सुसंस्कृतान् सुशिक्षितान् च संविधातुम्।

वस्तुतस्तु कादम्बर्या वर्णनान्यत्यन्तमद्भुतानि सन्ति, यत्र तात्कालिकसमाजस्य तात्कालिकसंस्कृतेः तात्कालिकधर्मदर्शनयोश्च स्वरूपं सहसा साजीव्यमाप्नोति, यद् दृष्ट्वा पाठकाः सहजरूपेण समाकृष्टाः सन्तः तं प्रशंसमाना आत्मानं धन्य मन्यन्ते।[8]

रससिद्धस्य महाकवेर्बाणभट्टस्य वर्णनेषु न केवलं रसाभिव्यञ्जकत्वमेव सर्वोपर्यस्ति, अपितु पदलालित्यं, शिल्पविधानस्य सौन्दर्यं, भावगा भीर्यं चान्यदप्यद्भुतमस्ति। प्रत्येकस्मिन् धरातले कादम्बर्यां सत्यानुसन्धानस्य महती शक्तिर्निगूढा वर्तते, या भारतीयशिक्षायाः सौरभेणाप्लाविताऽद्यापि विश्वमानवान् जीवनोपक्रमशिक्षणाय पर्याप्ताऽस्ति।[9] बाणस्य प्रतिभयैव इयं अद्भुता कथा आविर्भूता या लोककल्याणाय अनुपमा निधिरस्ति।

Correspondence
मीनाक्षी व्यास
शोधच्छात्रा, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, भारत

## संदर्भ


1. कादम्बरी – चाण्डालकथावर्णनम् /पृ.29–34
2. कादम्बरी – शुकवर्णनम्/पृ. 36–37
3. कादम्बरी – शुकनासोपदेश/पृ. 313–335
4. कादम्बरी – चन्द्रापीडशिक्षावर्णनम्/पृ.231–233
5. कादम्बरी – चन्द्रापीडदिग्विजयप्रस्थानवर्णनम्/पृ. 340–363
6. कादम्बरी – एक सांस्कृतिक अध्ययन/प्रस्तावना/पृ. 4
7. कादम्बरी – एक सांस्कृतिक अध्ययन/प्रस्तावना/पृ. 5
8. महाकविबाणभट्टः – देवेन्द्र उपाध्याय/पृ. 182
9. महाकविबाणभट्टः व्यक्तित्व एवं कृतित्व – डी.एन.शर्मा/पृ. 73–74